International Journal of Sanskrit Research 2023; 9(6): 12-16

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 12-16
© 2023 IJSR
www.anantaajournal.com
Received: 16-09-2023
Accepted: 18-10-2023

**रमेश मालाकार**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयस्य,
तिरुपतिः, आन्ध्रप्रदेशः, भारत

**Corresponding Author:**
**रमेश मालाकार**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयस्य,
तिरुपतिः, आन्ध्रप्रदेशः, भारत

# पाणिनीयदिशा रामायणबालकाण्डस्य प्रथमसर्गस्य प्रथमश्लोकस्य भूषणटीकानुसारं शब्दविज्ञानम्

**रमेश मालाकार**

**सारांश**

भारतीयसभ्यतायां संस्कृतभाषायाः साहित्यस्य च विशिष्टपरम्परा वर्तते यस्याः प्रतिष्ठाः सामाजिकसांस्कृतिकधार्मिकपक्षेष्वपि दृग्गोचरी भवति। मानवसभ्यतायाः संस्कृत्याश्च सम्बन्धः आदि-कालतः वर्तते। भारतीयसभ्यता–संस्कृति-आध्यात्मज्ञादीनां बीजं सन्निहितोऽस्ति। आश्रमेषु तपोवनेषु च ऋषिभिकृततपमाध्यमेन भारतीयसंस्कृतिः सुसमृद्धा सुसमपन्ना च जाता। भारतीय-समाजाय अयम् अलौकिकप्रेरणायाः धार्मिकतायाः आध्यात्मिकतायाश्च केन्द्रम्। रामायणं महाभारतमं च प्राचीनार्यज्ञानस्य विश्वकोशौ समुन्नतममानवसंस्कृतेराधारो च मन्वते। रामायणं महाभारतं इत्यादि सर्वे ग्रंथाः संस्कृत भाषायां वर्तन्ते। अतः शब्दज्ञानाय संस्कृतव्याकरणशास्त्रस्य अध्ययनमत्यंतावश्यकता। कः शब्दः कस्मिनर्थे प्रयुक्त तस्य कानि कानि अर्थानि भवन्ति इति अवश्यमेव ज्ञातव्यम्। एकः शब्दः अनेकार्थाः बोधयति यथा-तपो ज्ञानं, यस्य ज्ञानमयं तपः इति। यद्वा “यस्य ज्ञानमयं तपः” इति श्रुतेस्तपःशब्देन ब्रह्मविषयज्ञानमुच्यत इति तन्न। तपो वेदः। तपो ब्रह्म। तपो व्याकरणम् इति। तपो न्यासः। तपो ही स्वाध्यायः। स्वाध्यायो जपः, स्वाध्यायो वेदः। वाग्विदां-वाग्वेदः। वाक्व्याकरणं यश्च व्याकुरुते वाचम्। यद्वा वाग्विदः। वाक्सरस्वती गीर्वाग्वाणी सरस्वती इति वचनात्। “तपः स्वाध्याय इति ब्राह्मणम्” इत्यापस्तम्बोक्तेः। तस्मात्तपःशब्देन निदिध्यासनजन्यपरिपाकवद्ब्रह्म-ज्ञानमुच्यते। तपःशब्देन चित्तप्रसादहेतुभूतं व्रतनियमादिकर्मोच्यते। तपः स्वाध्यायनिरतमित्यनेन विद्योक्ता। इत्थं शब्दविज्ञानं बहूधा वर्णिताः।

**कूटशब्दः** वेदः, जपः, ज्ञानम्, तपो वेदः, तपो व्याकरणम्, तपो ब्रह्म, तपो न्यासः। स्वाध्यायो वेदः। विद्या। सरस्वती, वाग्विदः, वाक् सरस्वती, नारम्, तपस्वी, मुनिपुङ्गवम्, वाल्मिकि इत्यादि ।

## प्रस्तावना

अस्मिन् जगति विद्यमानेषु सर्वेष्वपि जीवेषु मनुष्यः एव हि सर्वश्रेष्ठः। मानवः सामाजिकप्राणी वर्तते, मानवजीवननिर्वाहणार्थं परस्परं व्यवहारोऽपि नितरामपेक्षितः। विना भाषां परस्परं व्यवहारः कर्तुं न शक्यते। अत एव कथ्यते भाषा नाम मानवस्य व्यावहारिकी सम्पत्तिः। यतो हि जगतः सर्वेऽपि व्यवहाराः भाषामूलका एव। भाषां विना लोके नैजमाशयं प्रकाशयितुं न प्रभवन्ति। अतः ईश्वरेण लोकव्यवहारार्थं काचन भाषाऽपि प्रदत्ता, संस्कृतभाषा सृष्टिकालतः प्रचलन्ती आस्ते। यतो हि केवलं संस्कृतभाषैवैतादृशी भाषा वर्तते, यस्याः भाषायाः व्याकरणं सर्वतो भावेन परिपूर्ण

परिष्कृतञ्चावलोक्यते, अनेनैव एतद् गौरवास्पदं वर्तते। वैदिकवेदवाङ्मयतस्समारभ्य सर्वाण्यपि वाङ्मयानि भाषापूर्णान्येव। भाषाज्ञानं च शब्दज्ञानपूर्वकमेव सम्पद्यते। शब्दज्ञानं, भाषायाः संस्करणं च व्याकरणज्ञानमन्तरा न सम्भवति। तथा चोक्तम् –

व्याकरणात्पदसिद्धिः पदसिद्धेरर्थनिर्णयो भवति।
अर्थात्तत्त्वज्ञानं, तत्त्वज्ञानात् परं श्रेयः1।।

संस्कृतभाषायाः व्याकरणं सुव्यवस्थितं नानाविधसूत्रादिभिः नियमितमस्ति। संस्कृतभाषा सुव्यवस्थितव्याकरणस्य कारणादेव बहुवर्षाणि यावत् वैदेशिकैराक्रमणकारिभिः पौनः पुन्येनाभि-भूतापि भाषेयमद्यापि तस्मिन्नेवापरिवर्तिते स्वरूपे वेविद्यते। अद्यावधि कस्यामप्यन्यस्यां भाषायां तादृशं सुपरिष्कृतं व्याकरणं नोपलभ्यते, यादृशं संस्कृतभाषायाः व्याकरणम्। अतः अद्यापि तथैव जीवति। व्याकरणं लोके वेदे च प्रयुज्यमानशब्दानां प्रकृतिप्रत्ययात्मकोपदेशपरं शास्त्रम्। व्याकरणशास्त्रेण पदानां पदार्थानाञ्चावबोधो जायते, अतः इदं सर्वशास्त्रोपकारकमित्यत्र नास्ति संशीतिलेशः।

**रामायणस्य माहात्म्यम्**

लौकिकसाहित्यस्य विषये आलोच्यमाने सर्वादौ रामायणं महाभारतमिति महाकाव्यद्वयं दृष्टिपथमायाति। तत्रादौ रामायणं प्रमुखस्थानं भजते।

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावत् रामायणकथा लोकेषु प्रचरिष्यति2।।

-इति श्लोकेन रामायणस्य माहात्म्यं कथितम्।
रामायणकाव्यविषये विश्वकविश्रीरवीन्द्रनाथठाकुरमहाशयास्तु मन्यन्ते- काव्यम् द्विधा- कविविशेषस्य काव्यम् कस्यचित् बृहतः सम्प्रदायस्य काव्यं च। द्वितीये प्रकारे न केवलं कवि-विशेषोऽपितु कृत्स्नः कश्चिद् भूभागः, कृत्स्नः कश्चिद् कालखण्डश्च स्वहृदयं स्वानुभवं च व्यक्तीकृत्य तत् काव्यं समग्रस्य मानवसमुदायस्य प्रतिपादनम्। रामायणमहाकाव्ये भारतभूनिःशेषमात्मानं प्रकटयति। बाल-अयोध्या-किस्किन्धा-सुन्दर-युद्धोत्तरभेदैः सप्तकाण्डैः विभक्तं रामायणमेव आदिकाव्यम् इति। काव्यस्यास्य रचयिता आदिकविः महर्षिवाल्मीकिः। आदिकविर्वाल्मीकिर्नाम मुनिश्रेष्ठस्तमसाती-रसमीपस्थे स्वाश्रम उवास। तस्य शिष्येष्वनेकेषु भरद्वाजो मुख्य आसीद् यतोऽयमेवैको रामायणे नाम्नोल्लेखितः। 'महर्षेराश्रमो जाह्नव्या अपि समीपे,' तस्या दक्षिणतीर एवाऽऽसीत्। गुणवतो वीर्यवतो धर्मज्ञस्य कस्यचिन्महापुरुषस्य चरित श्रोतुकामेन महर्षिणा वाल्मीकिना नारदमुखादेव रामचरितमाकर्णितम्। तदनन्तर सशिष्यो महर्षिः स्नानार्थी तमसातीरमगमत्। तत्र केनचिन्निषादेन क्रौञ्चमिथुनयोरेकः निहतमवलोक्य तच्छोकाकुलस्य महर्षेर्मुखात् -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

-इति श्लोक उदपद्यत। रामायणकाव्यस्योद्भवे मूलकारणं भवति इदमेव।
एतस्मिन्नन्तरे प्रजापतिर्ब्रह्मा तदीयाश्रममाजगाम। विस्मितेन मुनिना पृष्टो ब्रह्मा वाल्मीकिनोच्चारितायाश्छोन्दोमय्या वाप्याः श्लोक इत्याख्या कथिता। तदादेशेनैव महर्षिवाल्मीकिर्नारदाच्छुतं रामायण-काव्यं चतुर्विंशतिश्लोकसहस्रं रचयामास।

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम्3।।

**तपःस्वाध्यायशब्दविमर्श**

वेदसंपन्नत्वमाह तपःस्वाध्यायनिरतमिति। तपश्च स्वाध्यायश्च तपःस्वाध्यायौ। अल्पाच्तरं पूर्वमिति तपः शब्दस्य पूर्वनिपातः। द्वन्द्वे समासे अल्पाच्तरं पूर्व प्रयोज्यं भवति। यथा – शिवकेशवौ, तथैव - तपःस्वाध्यायौ। चार्थे द्वन्द्व अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते। तपश्च स्वाध्यायश्च तपः स्वाध्यायौ, इतरेतरयोगद्वन्द्वः समासः। मिलितानामन्वय इतरेतरयोगः भवति। तपः तापयति वा। तप उपतापे सर्व्वधातुभ्योऽसुन्। इति असुन्। तपो ज्ञानं – यस्य ज्ञानमयं तपः इति श्रुतेः। तपो वेदः "तपो हि स्वाध्यायः" इतिश्रुतेः। स्वाध्यायो जपः 'स्वाध्यायो वेदजपयोः' इत्युक्तेः। स्वाध्यायो वेदः। 'स्वाध्यायो वेदतपसोः' इति वैजयन्ती। तदाह मनुः तपो विद्या च विप्रस्य निःश्रेयसकरं परम्। तपसा कल्मषं हन्ति विद्यया ज्ञानमश्नुते इति।

**तपो ब्रह्म**

बृंहति बर्द्धते निरतिशयमहत्त्व-लक्षणबृद्धिमान् भवतीत्यर्थः। बृहिबृद्धौ + बृंहे- र्नोऽच्च4। मनिन् नकारस्याकारः। तपो ब्रह्म "ब्रम्हौतदुपास्स्वैत तपः" इतिश्रुतेः। तपःप्रधानः

1 माधवीयवृत्तिः, भूमीका
2 रामाय. १.२.३६-३७
3 रामाय.- १.१.१
4 उणा. - ४।१४५

स्वाध्यायस्तपःस्वाध्यायः। शाकपार्थिवादित्वान्मध्यमपदपीलोपी समास। "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इत्युक्तरीत्याध्ययनाध्यापनादिपरमित्यर्थः। "कायेन्द्रियशुद्धिरशुद्धिक्षयात् तपसः" तपः नाम कायशोषणम्। देहदण्डनमित्यर्थः। येन देहेन्द्रियाणां शुद्धिः बुद्ध्यते तत्र ।

**तपो व्याकरणं**

व्याक्रियन्ते अर्था येनेति व्याकरणम्। वि + आ + कृ + ल्युट्। व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दा अस्मिन् अनेनेति वा। तथोक्तं वाक्यपदीये -

आसत्रं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गं प्राहुव्याकरणं बुधाः[5] ।।

तपसामुत्तमं तपः। यानि लोके तपस्त्वेनाख्यातानि ब्रह्मचर्याधः शयनोदवासचान्द्रायणादीनि, ये च पवित्रतमाः स्वाध्यायास्तेषामिदं दृष्टादृष्ट विशेषफलहेतुत्वादभिख्याततमं तपः। यस्याक्षरसमाम्नायस्य ज्ञानमात्रेण सर्व वेदपुण्यफलावाप्तिरागमेन स्मर्यते, तच्छन्दसां प्रथममङ्ग, प्रधानत्वात्। महाभाष्येऽपि उक्तम् – 'प्रधानं च षड्वङ्गेषु व्याकरणं, प्रधाने च कृतो यत्नः फलवान् भवतीति[6]॥ यथा- महाभारते उक्तं - "व्यवसायात्मिका बुद्धिर्म्मनो व्याकरणात्मकम्"[7]। तपः स्वं यस्यासौ तपःस्वः अध्यायो वेदः। इङ् अध्ययनॆ इत्यस्माद्धातोरध्यायन्येत्यादिना निपातनात् अत एव "स्वाध्यायोऽध्येत्तव्यः" इत्यत्र स्वस्य अध्यायः स्वाध्यायः स्वशाखेत्याचार्यैव्याख्यातं तत्र निरतोऽध्यायनिरतः तपः स्वश्चासावध्यायनिरतश्र तपःस्वाध्याय निरतः इति कर्मधारयः तम्। तपो ब्रह्म तद्रूपः स्वाध्यायः तपःस्वाध्याय तस्मिन् निरतं सामगानलोलमित्यर्थः। 'वेदानां सामवेदोऽस्मि' इति भगवता गीतत्वात् -

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतन।।[8]

एवं वेदाध्ययनमुक्तम् -
यदधीतमविज्ञातं निगदेनैव शब्दयते।
अनग्राविव शुष्कैथो न तज्ज्वलति कहिंचित् इति[9] ।।

केवलाध्ययनस्य निन्दितत्वात्तदर्थज्ञत्वमाह - चाग्विदां वरमिति। वाग्वेदः 'अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा इति वाक्शब्दस्य वेदे प्रयोगात्। तां विदन्ति जानन्ति इति वाग्विदः वेदार्थज्ञाः तेषां मध्ये निर्धारणे षष्ठी। वाक् व्याकरणं 'यत्र व्याकुरुते वाचम्। वाग्योगविद् दुष्यति चापशब्दैः।

यस्तु प्रयुक्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्विद् दुष्यति चापशब्दैः [10]।।

इत्यादौ व्याकरणपर्यायत्वेन शिष्टैर्व्यवहृतत्वात्। एतदङ्गान्तराणामुपलक्षणं षडङ्गविदामग्रेसरमि-त्यर्थः।

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसामिति।
ज्योतिषामयनं चैव षडंगो वेद उच्यते ॥
एतेन वेदार्थाभिज्ञत्वमर्थसिद्धम्।

**वाग्विदः**

उच्यतेऽसौ अनया वेति। वच् + क्विप्, वचिप्रच्छीति[11]। इति क्विप् दीर्घोऽसम्प्रसारणञ्च। वाक्यम्। वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्मीमिच्छता॥ सरस्वती। इत्यमरः॥ (यथा -" प्रणम्य वाचं निःशेषपदार्थोद्योतदीपिकाम्। बृहत्कथायाः सारस्य संग्रहं रचयाम्यहम [12] ॥ वाग्विदः यावद्विव क्षितार्थप्रतिपादनक्षमशब्दप्रयोगविदः। पूर्वमुक्तं वेदाध्ययनम् अत्र तदध्यापनम्। गोबलीवर्दन्यायः - अनेन चतुर्दशविद्यास्थानवेदित्यमुक्तम्। ऋग्वेदं भगवो-ध्येऽमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्यमि इति तदिदमुथ्यते वाग्विदां वरमिति।

**वाक् सरस्वती**

'गीर्वाग्वाणी सरस्वती' इति वचनात् वाक् सरस्वती। विद्लृ लाभे इत्यस्माद्धातोः कर्मणि क्विप् कृते सति वाक् शब्दस्य निष्पत्तिर्भवति। तया विद्यन्ते लभ्यन्त इति वाग्विदः। तपः स्वाध्यायनिरतमित्यनेन विद्योक्ता। सरो नीरं तद्वत् रसो वास्त्यस्या इति। सरस् + मतुप्। मस्य वः। तसौ मत्वर्थ इति। यथा- "ते तया तैश्च सा वीरैः पतिभिः

[5] वा.प. ब्र.का.श्लो.-११
[6] महा.भा.प्र आन्हिक
[7] महा.भा. १२/२५१/११
[8] श्री.भा.गी. 10.12
[9] महा.भा.प्र आन्हिक
[10] महा.भा.प्र आन्हिक
[11] उणा -२।५७
[12] कथासरित्सागरे -१ ।३।

सह पञ्चभिः। बभूव परमप्रीता नागैरिव सरस्वती [13]। वाणी। यथा -देवीपुराणे ४५ अध्याये। "स्वराः स्वरणशीलत्वात् गेयाख्याः सप्त कीर्त्तिताः। अतिप्रापणदाने वा तेन देवी सरस्वती॥" वाग्देवता। तत्पर्य्यायः। ब्राह्मी, भारती, भाषा, गीः, वाक्, बाणी इत्यमरः॥ इरा, सारदा, गिरा, गिरांदेवी, गीर्द्देवी।

## मुनिपुंगवम्

मनुते जानाति यः मुनिः। मुनयोः मननशीलाः "मनेरुच्च" इति इन्प्रत्ययः। पुमांश्चासौ गौश्चेति पुंगवः "गोरतद्धितलुकि" इति समासान्तष्टच् प्रत्ययः श्रेष्ठ इत्यर्थः। बुधे च पुंगवः श्रेष्ठे तृषभे भिषजां वरे "इति विश्वः। मुनिषु पुंगवो मुनिपुंगवः। तम् मुनिपुंगवमिति। तपःस्वाध्यायनिरतमित्यनेन वेदार्थस्य श्रवणमुक्तं, वाग्विदां वरमित्यनेन मननं मुनिपुंगवमित्यनेन" निदिध्यासनम्।

## नारम्

नरस्य संबन्धि नारम् "नराच्चेति वक्तव्यम्" इत्यण्। अज्ञानमित्यर्थः। तत् द्यति खण्डयतीति नारदः। दो अवखण्डने इत्यस्माद्धातोः। "आदेच उपदेशेऽशिति" इत्यात्वे सति "आतोऽनुपसर्गे कः" इति कः प्रत्ययः। अज्ञाननिवर्तक इत्यर्थः। उत्तं च नारदीये' गायन्नारायणकथां सदा मायाभयापहाम्। नारदो नाशयन्नेति नृणामज्ञानजं तमः' इति। यद्वा नारं ज्ञानं तद्ददाति इति नारदः। यद्वा नरति सद्गतिं प्रापयति इति नरः परमात्मा। नृ नय इत्यस्मादातोः पचाद्यच्। स एव नारस्तं ददात्युपदिशति इति नारदस्तम्।

## तपस्वी

तपोऽस्यास्तीति तपस्वी "तपः सहस्राभ्यां विनीनी" इतिमत्वर्थीयो विनिप्रत्ययः। तपोऽस्यास्मिन् वा विद्यते तपस्वी। भूमादयो मत्वर्थाः। तदुक्तम् 'भूमनिन्दा प्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः' इति । ब्रम्हज्ञानसाधनं तप उक्तम् । यद्वा तपो वेदो व्याकरणं ज्ञानं च तद्वान्। यथा। "न हिंस्याद्ब्राह्मणान् गाश्च सर्व्वांश्चैव तपस्विनः [14]॥ तपस्वी तापसे शोच्ये' इति वैजयन्ती। तेन हि ब्रह्मज्ञानाधिकारी। तपस्वीत्यनेन शमदमादिसंपत्तिरपि सिद्धा। शमादयस्तु – शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः[15]।

## वाल्मीकि

वल्मीके भवः। वाल्मीकि+इञ्। वल्मीकस्यापत्यं वाल्मीकिः "अत इञ्" इतीञ्प्रत्ययः। भृगुवंशीयमुनिविशेषः। भार्गवेण तपस्विना 'इति च। अन्यत्र च प्रचेतोपत्यत्वमभिधीयते' चक्रे प्रचेतसः पुत्रस्तं ब्रह्माप्यन्वमन्यत 'इति' वेदः प्राचेतसादासीत् 'इति' च प्रसिद्धम्।

## परिपप्रच्छ

परिपप्रच्छेति परोक्षे लिट्। परि+पप्रच्छ "लिट् च" अनेन आर्धधातुक, शप् स्थाने अण् "परस्मैपदानां णलतुसुस्थ-लथुसणल्वमाः", "लिटि धातोरनभ्यासस्य" द्वित्वः, हलादि शेषः द्वित्वःकृत्वा परिपप्रच्छ। परिपप्रच्छ परि विशेषेण पृष्टवान्। तप इति भिन्नं पदं वा ब्रह्मवाचि। नारदं ब्रह्म परिपप्रच्छेत्यर्थः।' ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इतिवत्। स्वस्मिन्नन्यत्व-मारोप्य परोक्षनिर्देशो वा। अनेन "परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात्रा रुत्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेव अभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। तस्मै स विद्वानुपसनाय सम्यक्प्रशान्तचित्ताय शमान्विताय।

तपस्वीत्यनेन परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायादित्यस्यार्थोऽदर्शि।

अधीतसाङ्गसशिरस्कवेदोधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलापो हि तपस्वि-शब्दार्थो वर्णितः। वाल्मीकिरित्यनेन सम्यकप्रशान्तचित्ताय शमान्वितायेत्यस्यार्थो दर्शितः। स्वाध्यायनिरतमित्यनेन श्रोत्रियपदार्थ उक्तः "श्रोत्रियंश्छन्दोऽधीते" इति श्रोत्रियशब्दार्थप्रकाशनात्। वाग्विदां वरमित्यनेन विद्वच्छब्दार्थः। मुनिपुंगवमित्यनेन ब्रह्मनिष्ठशब्दार्थः। नारदशब्देन गुरुशब्दार्थः।' गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्नि-रोधकः। अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते' इति तनिरुक्तिः। परिपप्रच्छेत्यनेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्येतदुपपादितम्। "विधिवदुपसन्नः पप्रच्छ" इति श्रुतेः। अत्र ब्रह्मवाचितपः शब्दप्रयोगेण देवतानमस्काररूपं मङ्गलमाचरितम्। मङ्गलं नाम देवतावाचकाः शब्दा ये च भद्रादिवाचका इति।

तपश्शब्दस्य तकारार्थः मंगलार्थमपीत्यपि। प्रथमे श्लोके तथोक्तम् अइति भगवतो नारायणस्य प्रथमाभिधानमभिदधता किं नाम मङ्गलं न कृतमिति। 'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे मङ्गलार्थाः स्युर्लिपितो गणतोऽपि च' इति। निरन्तरनिरतिशयानन्दरूपं तपो ज्ञानरूपं ब्रह्म स्वाध्याय सुष्ठु ध्यात्वे देवतानमस्कारः गुरुनमस्कारश्च कृतो भवति। कथं तपःसु निद नारदमाध्याय परिपप्रच्छेति। यद्वा परि पूजयित्वेत्यर्थः। 'परिः समन्ततो भावव्याप्तिदोषकथासु च। भाषाश्लेषे पूजने च वर्जने

[13] महा.भा.-१।२१४।३

[14]मनुसमृति-।४।१६२

[15] वेदा.सा.

वचने शुभे' इतिवचनाद् नारदं संपूज्य पप्रच्छेत्यर्थः। 'पराशरं मुनिवरं कृतपौर्वाह्निक क्रियम्। मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च इतिवत्। अस्य श्रीरामायणस्य गायत्र्यक्षरसंख्यानुसारेण चतुर्विंशतिसहस्रग्रन्थसङ्ख्यया प्रवृत्तत्वात् प्रथमसहस्रोपक्रमे तकारः प्रयोक्तव्य इति सत्स्वपि ब्रह्मवाचकेषु शब्दान्तरेषु तपः शब्दस्यैव प्रयोगः। प्रबन्धादौ तकारप्रयोगश्चावश्यकः। तस्य वक्तुर्वाचकस्य च सौख्यकरत्वात्। तथोक्तम्' वस्तुलाभकरोणस्तु तकारः सौख्यदायकः 'इति। साहित्यचूडामणौ तु' तकारो विघ्ननाशकः 'इत्युक्तम्। किंच तकारस्य जलं भूतं बृहस्पतिर्देवता। अतः शुभावहोऽनेन प्रबन्धारम्भः। अत एवोक्तं चमत्कारचन्द्रि कायाम्' वर्णानामुद्भवः पश्चाद्वयक्तिः सङ्ख्या ततः परम्।

## सारांश

तपःस्वाध्यायेत्यादि इत्यन्तेन संबन्धः। तपस्त्वेन श्रुतः स्वाध्यायस्तपःस्वाध्यायः। "तपः स्वाध्याय इति ब्राह्मणम्" इत्यापस्तम्बोक्तेः। स्वाध्यायशब्देनाप्रायत्यानध्यय नका-लदेशपरिहा -रादिनियमोपेततया फलवदर्थावबोधपर्यन्तं स्वशाखाध्ययन-मुच्यते। तस्मिन्निरतः तदभ्यासनिरत इति यावत् यत्तु तपश्च स्वाध्यायश्च तपःस्वाध्यायौ तयोर्निरतः। तपःशब्देन चित्तप्रसादहेतुभूतं व्रतनियमादिकर्मोच्यते। यद्वा "यस्य ज्ञानमयं तपः" इति श्रुतेस्तपःशब्देन ब्रह्मविषयज्ञानमुच्यत इति तन्न। तपोविशिष्टपुंविशेष प्रसिद्धमुनिपुंगवशब्देनैवोक्ततपःसंपत्तेः सिद्धत्वादित कतककृतः। एवं हि तपोरतमित्येव सिद्धे स्वाध्यायपदवैयर्थ्यापत्तिः। तस्मात्तपः शब्देन निदिध्यासनजन्य-परिपाकव-द्रह्मज्ञानमुच्यते। मुनिपुंगवशब्देन मननजन्य-परिपाक-वत्वमेवोच्यत इति न तेन गतार्थतेत्यन्ये। वाग्विदां। तपः स्वाध्यायनिरतमित्यनेन विद्योक्ता। इत्थं तपश्शब्दस्य शब्दविज्ञानं। मुनिपुंगवशब्देन मननजन्यपरिपाकर्व श्वमेवोच्यत इति न तेन गतार्थतेत्यन्ये। वाग्विदां स्वरूपतोऽर्थतश्च शब्दब्रह्मतत्त्वविदां पाणिनिपतञ्जल्यादीनां मध्ये वरं श्रेष्ठम्। मुनिशब्द उक्तार्थः। तेषु पुंगवं श्रेष्ठम्। एवं विशिष्टं नारदम्। तपस्वी कृच्छ्रैकादश्युपवासादिलक्षणं मुख्यं तपः, "तपो नानशनात्परम्" इति श्रुतेः स्वाध्यायरूपं च तपः, समनस्केन्द्रियाणामैकाग्र्यरूपं च तपस्तद्वान्। वाल्मीकिर्वल्मीकस्यापत्यम्' वल्मीकप्रभवो यस्मात्त-स्माद्वाल्मीकिरित्यसौ' इति ब्रह्मवैवर्तोक्तेः। वल्मीकापत्यत्वं गृहीत्वेञ् साधुरपत्यार्थः । यद्वा वल्मीक इति ऋषिविशेषस्य संज्ञेत्याहुः। नारदम् नराणामिदं नारमज्ञानं तद्यति खण्डयति ज्ञानोपदेशेनेति नारदः 'गायन्नारायणकथां सदा पापभयापहाम्। नारदो नाशयन्नेति नृणामज्ञानजं तमः' इति नारदीयोक्तेः। तं पप्रच्छेत्वन्वयः। अत्र प्रष्टुरुक्तविशेषणेन दिव्यार्थविषयश्रवणाधिकारसंपदुक्ता। वक्तरयुक्तविशेषणः सार्वज्ञ्यादि प्रतिपादितम्। ग्रहणधारणहेतु-शिष्यानुग्रहशक्तिमत्वं च प्रतिपादितम् ॥ १ ॥

## उपसंहार

एतादृशाः व्याकरणविचारः बहूधा कृतः। तद्यथा तपश्शब्दस्यार्थः वेदः,जपः,ज्ञानम्, तपो वेदः, तपो व्याकरणम्, तपो ब्रह्म, तपो न्यासः। स्वाध्यायो वेदः। तपः स्वाध्यायनिरतमित्यनेन विद्योक्ता। इत्थं शब्दविज्ञानं बहूधा वर्णिताः। शब्दा अनेकार्थी भवन्ति। कः शब्दः कस्मिन् अर्थेऽस्ति तदवश्यमेव ज्ञातव्यमतः शब्दविज्ञानाय व्याकरणशास्त्रस्याध्ययनमत्यन्तावश्यकम्।

## सन्दर्भ


1. महाभाष्यं प्रदीपोद्योतसहितं छायाटिकोपेतञ्च, चौखाम्वा संस्कृतप्रतिष्ठान, वाराणसी
2. संस्कृतव्याकरणशास्त्रैतिहासविमर्शः, अशोकचन्द्रगौरशास्त्री, भारतीय विद्यासंस्थान, वाराणसी, 1997
3. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितः, सम्पा. श्री. गोविन्दाचार्य, चौखाम्वा संस्कृत प्रतिष्ठान दिल्ली, 38 यू.ए बंगला रोड़, जवाहर नगर, दिल्ली
4. वाल्मीकिमुनिप्रणितं रामायणं तिलक-शिरोमणि-भूषणेति टीकात्रयेणोपस्कृतम्, परिमल पब्लिकेशन्स 26-27, शक्तिनगर दिल्ली 110007
5. वाक्यपदीयम् (ब्रम्हकाण्डम्) चौखाम्बा संस्कृत प्रतिष्ठान दिल्ली, 38 यू.ए बंगला रोड़, जवाहर नगर, दिल्ली
6. वेदान्तसारः,श्रीसदानंदप्रणीतः, चौखाम्बा विद्याभवन चौक, वाराणसी-221001
7. अमरकोशः (रामाश्रमीव्याख्योपेतः), अमरसिंहः, शिवदत्तदाधिमथः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १ ९ ७०